दिनाङ्क :-03.03.2025

प्रात: - 06:55

## प्रधानमन्त्री गुजरात

**प्रधानमन्त्री नरेन्द्रमोदी अद्य गुजरातस्य सासने राष्ट्रियवन्यजीवमण्डलस्य सप्तमोपवेशनस्य अध्यक्षतां करिष्यति, यत्र वन्यजीवसम्बद्धेषु राष्ट्रियस्तरीयविषयेषु च चर्चा भविष्यति। एतत् मण्डलं वन्यजीवानां, वनानां च संरक्षणाय विकासाय प्रवर्धनाय च कार्यं करोति । प्रधानमन्त्री अस्य मण्डलस्य पदेन अध्यक्षः भवति । अद्य प्रातः प्रधानमन्त्रीमोदी एशियाईसिंहानां अन्तिमनिवासस्थाने गिरराष्ट्रियोद्याने भ्रमणं करिष्यति।**

## शाह- कार्यशाला

**केन्द्रीयगृहमन्त्री अमितशाह: अद्य नवदिल्ल्यां दुग्धक्षेत्रस्य स्थायित्वस्य परिपत्रस्य च कार्यशालायाः उद्घाटनं करिष्यति। कार्यशाला सहकारितामन्त्रालयस्य तथा पशु-दुग्ध-मत्स्यपालनमन्त्रालयानां नीतयः उपक्रमाः च केन्द्रीक्रियन्ते येषां उद्देश्यं पर्यावरणीयदायित्वं समेत्य आर्थिकवृद्धिं सुनिश्चित्य स्थायिदुग्धोत्पादनम् प्रवर्धनं भवति।**

## अमितशाह:/मादकद्रव्यम्

**गृहमंत्री अमितशाह: ह्यः सूचितवान् यत् सम्पूर्णे देशे द्वादशविभिन्नप्रकरणेषु एकोन-त्रिंशत् मादकद्रव्याणां विक्रेतार: न्यायालयेन दण्डिता: सन्ति। सामाजिक अन्तर्जालीय प्रसारतन्त्र-माध्यमेन श्रीशाह: अवदत् यत् नरेन्द्रमोदी सर्वकार: मादकद्रव्याणां विक्रेतृन् न्यायालयं प्रति आनेतुं प्रतिबद्ध: अस्ति। सममेव श्रीशाह: प्रोक्तवान् यत् सर्वकारोऽयं मादकद्रव्याणां प्रकोपं विरुध्य अथ च मादक द्रव्यात् मुक्त भारतं कर्तुं प्रयासं करिष्यतीति।**

**जम्मू-कश्मीर-बजट-सत्रम् :**

**जम्मू-कश्मीरस्य एकमासव्यापी आय-व्यय-वित्त-संकल्पना सत्रस्य आरम्भः अद्य जम्मू-नगरस्य नागरिकसचिवालयस्य विधानसभा-सङ्कुले उपराज्यपाल-मनोज-सिन्हायाः सम्बोधनेन भविष्यति। गतवर्षस्य अक्टोबर् मासे सत्ता प्राप्तेः अनन्तरम् मुख्यमन्त्रिणः उमर अब्दुल्लायाः नेतृत्वे एतत् प्रथमं आयव्यय-वित्त-संकल्पना-पत्र सत्रम् भविष्यति।**

**उपराष्ट्रपति-केरल**

**उपराष्ट्रपति: जनदीपधनखड: प्रोक्तवान् यत् विकसित भारतम् केवलं स्वप्न: नास्ति, एष: अस्माकं उद्देश्य: अस्ति1 अस्मिन् उद्देश्ये यून: महत्त्वपूर्णां भूमिकां निर्वहन्ति। स: ह्यः तिरुवनन्तपुरम्-नगरे भारतीय-विचार-केन्द्र द्वारा आयोजिते चतुर्थ्यां पी.परमेश्वरन्-स्मृति व्याख्यानमालायां भाषमाण: आसीत्। श्रीधनखड: अवदत् यत् देशे यत्किमपि भवति तत् वैश्विकरुपेण अस्मान् गौरवान्वितं करोति। स: अवदत् यत् भारतं सम्प्रति विश्वस्य पञ्चतमी अर्थव्यवस्था अस्ति तथा च शीघ्रमेव चतुर्थी बृहत्तमी वैश्विकी अर्थव्यवस्था भवितुं शक्नोति। असौ कार्यक्रमस्यास्य अनन्तरं हैदराबादं प्रति प्रस्थितवान्।**

**जेलेंस्की-अमरीका**

**यूक्रेन देशस्य राष्ट्रपति: व्लादिमिर जेलेंस्की अवदत् यत् अमरीकादेशस्य राष्ट्रपतिन: डोनाल्ड-ट्रम्पस्य समर्थनं स्वदेशस्य कृते महत्त्वपूर्णम् अस्ति। व्हाइट हाउस इति स्थले प्रचलितायां अमेरिकाया: राष्ट्रपति: उपराष्ट्रपति: चोभयो एकस्मिन् परिचर्चायाम् एतद् वक्तव्यम् आगतम्।**

**चैम्पियन्स्-ट्रॉफी**

**आईसीसीचैम्पियन्स् ट्रॉफीति प्रतिस्पर्धायाम् गतरात्रौ दुबई अन्तर्राष्ट्रीयक्रिकेट् क्रीडाङ्गणे भारतेन न्यूजीलैण्ड्-दलं चतुश्चत्वरिंशत् धावनांकैः पराजितम्।**